१६॥

व्याकरण

क्र.नं. १६ ४८। व्या ११

मध्यमा कौमुदी

इ. वि. का. राजवाडे संशोधन मंदिर
क्रमांक ...१...
हस्तलिखित ग्रंथ संग्रह.

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥श्रीगणेशाय नमः॥ धातोः॥ आ तृतीयाध्यायांते ये प्रत्ययास्ते धातोः परे स्युः। अधिकारः। कृदतिङिति कृत्सं-
ज्ञा। वासरूपोस्त्रियां। अस्मिन्धात्वधिकारे असरूपोपवादप्रत्यय उत्सर्गस्य बाधकः स्यादस्त्र्यधिकारोक्तं वि-
ना। कृत्याः। ण्वुल्तृचावित्यतः प्राक् कृत्यसंज्ञाः स्युः। कर्तरि कृत्। इति प्राप्ते। तयोरेव कृत्यक्तखलर्थाः।
एते भावकर्मणोरेव स्युः। तव्यत्तव्यानीयरः। धातोरेते स्युः। तकारौ स्वरार्थौ। एधितव्यं एधनीयं त्वया।
भावे औत्सर्गिकमेकवचनं क्लीबत्वं च। चेतव्यश्चयनीयो वा धर्मस्त्वया। केलिमर उपसंख्यानं। पचे-
सं॰ र॰ ली॰ लिमा माषाः। पक्तव्या इत्यर्थः। भिदेलिमाः। कर्मणि प्रत्ययः। वसेस्तव्यत्कर्तरि णिच्च। वसतीति वास्तव्यः।
कृत्यचः। उपसर्गस्थान्निमित्तात्परस्याचः परस्य कृत्स्थस्य नस्य णत्वं स्यात्। प्रायणीयं। अचः किं। प्रमग्नः।
निर्विण्णस्योपसंख्यानं। अचः परत्वाभावादप्राप्ते वचनं। परस्य णत्वं पूर्वस्य ष्टुत्वं। निर्विण्णः। णेर्विभा-
षा। प्रयापणीयं। प्रयापनीयं। हलश्चेजुपधात्। हलादेरिजुपधात् कृत्स्थस्याचः परस्य णो वा। प्रको-
पणीयं। प्रकोपनीयं। हलः किं। प्रोहणीयं। इजुपधात्किं। प्रवपणीयं। इजादेः सनुमः। सनुमश्चेद्भवति इजा-
देर्हलन्तात् विहितो यः कृत्स्थस्य णो वा। प्रेंखणीयं। इजादेः किं। मगि सर्पणे। प्रमंगनीयं। वा निंसनिक्षनिंदां। ए-
षां नस्य णो वा कृति। प्रणिंसितव्यं। प्रनिंसितव्यं। न भाभूपूकमिगमिप्यायीवेपां। एभ्यः कृत्स्थस्य णो न।
प्रभानीयं। प्रभवनीयं। ण्यन्त एवेह गृह्यते। प्रभावनीयः। सोमः। ण्यंतभादीनामुपसंख्यानं। प्रभाप

इ॰ का॰ राजवाडे संशोधन मंदिर
क्रमांक ...16...

(२)

नीयं। कृत्यल्युटो बहुलं। क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव। विधेर्विधानं बहु
धा समीक्ष्य चतुर्विधं बाहुलकं वदंति। स्नात्यनेनेति स्नानीयं चूर्णं। दीयतेस्मै दानीयो विप्रः। ऋद
दुपधाच्चाक्लृपिचृतेः। क्यप् स्यात्। वृतु। वृत्यं। वृधु। वृध्यं। कृपिचृत्योस्तु। कल्प्यं। चर्त्यं। अचो य तपरः किं
त्। नेयं। जेयं। ईद्यति। आतः। गुणः। देयं। ग्लेयं। हनो वा यद्वधश्च। वध्यः। पक्षे ण्यत्। घात्यः। पोरदुपधात्। दृ[illegible]क्)
पवर्गान्तादुपधाद्यत् स्यात् ण्यतोपवादः। शप्यं। लभ्यं। आङो यि। आङः परस्य लभेर्नुम् स्याद्यादौ प्रत्यये। आ र्त्यं।
लंभ्या गौः। उपात्प्रशंसायां। उपलंभ्यः साधुः। स्तुतौ किं। उपलब्धुं शक्य उपलभ्यः। शकि सहोश्च। शक्यं।
सह्यं। गदमदचरयमश्चानुपसर्गे। गद्यं। मद्यं। चर्यं। चरेराङि चागुरौ। आचार्यो देशः। अगुरौ किं।
आचार्यो गुरुः। यम्यं। अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु। अवद्यं पापं। गर्ह्ये किं। अनुद्यं गुरु
नाम। तद्धि न गर्ह्यं। वचनानर्हं। आत्मनाम गुरोर्नाम नामातिकृपणस्य च। श्रेयस्कामो न गृह्णीयाज्ज्येष्ठा
पत्यकलत्रयोरिति स्मरतेः। पण्या गौः। व्यवहर्तव्या इत्यर्थः। पाण्यमन्यत्र। स्तुत्यर्हमित्यर्थः। पण्यं विक्रे
यं। शतेन वर्या कन्या। वृत्यान्या। वह्यं करणं। वहत्यनेनेति वह्यं शकटं। वाह्यमन्यत्। अर्यः स्वामिवै
श्ययोः। अनयोः किं। आर्यो ब्राह्मणः। उपसर्या काल्या प्रजने। गर्भग्रहणे प्राप्तकाला चेदित्यर्थः। उपस

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

८ अस्यार्थः। अवश्यमित्यस्य मकारस्य लोपो भवति कृत्ये तुं काम मनसोः परे। अवश्यकामः तुं काम मकारस्य लोपो भवति काम मनसोः परयोः। गंतुकामः। गंतुमनाः। सोम पकारस्य लोपो भवति हितततयोः
८ परयोः सहितः। सततं। संततं। मांसशब्दस्य अकारलोपो भवति पुट् घञ् परे। मांसपचनं। मांसपाकः। ... पान्निदेशः। ... ॥८

म॰ कौ॰ श्रीणोः। गर्भाधानार्थं विषये पो। पगंतुं योग्येत्यर्थः। प्रजने काल्ये निर्देशः। उपसर्या काशी प्राप्तव्येत्यर्थः।
अजर्यं संगतं॥ निर्देशोऽयं चेत्। नजीर्यतीत्यजर्यं। वदः सुपि क्यप् च। वा यत्। अप्रो यं। ब्रह्मवद्यं। ब्रह्मवेद
२ स्तस्य वदनमित्यर्थः। भुवो भावे। क्यप्। ब्रह्मणो भावो ब्रह्मभूयं। सुपीत्येव। भव्यं। अनुपसर्गादित्येव।
प्रभाव्यं। हनस्त च। चात्क्यप्। ब्रह्मणो हननं ब्रह्महत्या। एतिस्तुशास्वृदृजुषः क्यप्। ह्रस्वस्य पिति
शासइदङ्हलोः। कृति तुक्। इत्यः। स्तुत्यः। शिष्यः। वृङो वृञो वृत्यः। वृत्यः। वृङः स्तु वार्या ऋत्विजः। आदृत्यः। जुष्यः।
पुनः क्यब्ग्रहणं परस्यापि ण्यतो बाधनाय। अवश्यस्तुत्यः। मृजेर्विभाषा। मृजेः क्यप् वा। ऋहलोर्ण्यत्।
ऋवर्णान्ताद्धलंताच्च ण्यत्। चजोः कु घिण्ण्यतोः। कुत्वं स्यात् निष्ठायामनिट इति वक्तव्यं।
(3) तेनेतने। मार्ग्यो गर्ज्यः। ओरावश्यके। ण्यत्। पाव्यं। लुंपेदवश्यमः कृत्ये तुंकाममनसोरपि। समो
वा हितततयोर्मांसस्य पचि युड्घञोः। भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्या
पात्या वा। एते कृत्याः कर्तरि वा निपात्यंते। भवतीति भव्यः। भव्यमनेन वा। भोज्यं भक्ष्ये। भोग्यमन्यत्।
राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः। एते सप्त क्यबंता निपात्यंते। भिद्योद्ध्यौ नदे। नदे हेरंब
किं। भेत्ता। उज्झिता। पुष्यसिद्ध्यौ नक्षत्रे। विपूयविनीयजित्या मुंजकल्कहलिषु। विपूयो मुंजः। विनी
यः कल्कः। जित्यो हलिः। प्रत्यपिभ्यां ग्रहेश्छंदसि। इति वक्तव्यं। प्रतिगृह्यं। अपिगृह्यं। लोके तु प्रतिग्रा २

(3A

लोकेतु प्रतिग्राह्यं। पद्यास्वैरिबाह्यापक्षेषु च। अवगृह्यं। प्रगृह्यं पदं। अस्वैरी परतंत्रः। गृह्यकाः शुकाः। ग्रामगृह्या
सेना। आर्यैर्गृह्यते। आर्यगृह्यः। तत्पक्षाश्रित इत्यर्थः। विभाषा कृवृषोः। कृत्यं। वृष्यं। पक्षे ण्यत्। कार्यं। वर्ष्यं।
युग्यं च पत्रे। पत्रं वाहनं। योग्यमन्यत्। अमावस्यदन्यतरस्यां। अपोपपदाद्वसेरधिकरणे ण्यत् वृद्ध्यभा
वश्च वा निपात्यते। अमा सह वसतोस्यां चंद्रार्कौ इति अमावस्या। अमावास्या वा। अग्नौ परिचाय्योपचाय्यस
मूह्याः। अग्न्याधारस्थलविशेषः। चेतेसंधवाः। एतौ कुंडपाय्यसंचाय्यौ। चित्याग्निचित्ये च। चीयतेऽसौ।
चित्योऽग्निः। अग्नेश्चयनमग्निचित्या। इति कृत्यप्रक्रिया। ण्वुल्तृचौ। धातोरेतौ स्तः। कर्त्तरि कृदिति कर्त्रर्थे। युवो
रनाकौ। युवुं एतयोरनुनासिकयोरेतौ स्तः। कारकः। कर्ता। नंदिग्रहिपचादिभ्यो ल्युणिन्यचः। नंद्यादेर्ल्युः। ग्र
हादेर्णिनिः पच्यादेरच् स्यात्। नंदयतीति नंदनः। जनार्दनः। लवणः। नंद्यादिगणे निपातनात् णत्वं। ग्रा
ही। स्थायी। मंत्री। पचः। आकृतिगणोयं। इगुपधज्ञाप्रीकिरः कः। क्षिपः। बुधः। कृशः। ज्ञः। प्रियः। किरः। आ
आतश्चोपसर्गे। प्रज्ञः। सुग्लः। पाघ्राध्माधेट्दृशः शः। पिबः। जिघ्रः। धमः। धयः। पश्यः। अनुपसर्गाल्लिं
पविंदधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च। शः स्यात्। लिंपः। विंदः। धारयः। पारयः। वेदयः। उदे
जयः। चेतयः। सातयः। साहयः। अनुपसर्गात्किं। प्रलिपः। नौ लिंपेर्वाच्यं। गवादिषु विंदेः संज्ञायां। गोविंदः। अ
रविंदं। ददातिदधात्योर्विभाषा। पक्षे वक्ष्यमाणो णः। ज्वलितिकसंतेभ्यो णः। वा स्यात्। ज्वालः। ज्वलः। चालः।

Sanshodhan Mandal, Dhule and ... Chavan Pratishthan Mumbai

म. को.
२
(५)

चलः। ग्रहाद्यधास्तु संख्वर्ती णवसा न हे लिहश्व्यसश्च। अवश्यायः। आत्। धायः। व्याधः। आस्त्रावः। संस्त्रा
वः। अत्यायः। अवसायः। अवहारः। लेहः। श्लेषः। श्वासः। विभाषा ग्रहः। व्यवस्थितविभाषेयं। तेन जलचरे ग्रा
हः। ज्योतिषि ग्रहः। गेहे कः। गृह्णाति धान्यादिकमिति गृहं। शिल्पिनि ष्वुन्। क्रिया कौशलं शिल्पं। षः प्रत्यय
स्य। इति। न्टतिखनिरंजिभ्य एव। नर्त्तकः। खनकः। अके अने च रंजेर्न्लोपो वाच्यः। रजकः। गरछकः। गाथ
कः। ण्युट्। गायनः। प्रुसृल्वः समभिहारे वुन्। समभिहारग्रहणेन साधुकारित्वे लक्ष्यते। प्रवकः। स्रव
कः। लवकः। आशिषि च। वुन् स्यात्। जीवतात् जीवकः। तत्रोपपदं सप्तमीस्थं। सप्तम्यंतेपदे कर्मणीत्या
दौ वाच्यत्वेन स्थितं कुंभादि तद्वाचकं पदमुपपदसंज्ञं स्यात्। कर्मण्यण्। कर्मण्युपपदे धातोरण्। कुं
भं करोतीति कुंभकारः। आतोनुपसर्गे कः। सुप्युपपदे। अणोपवादः। गोदः। कंबलदः। अनुपसर्गे
किं। गोसंदायः। मूलविभुजादिभ्यः कः। मूलानि विभुजति मूलविभुजो रथः। आकृतिगणोयं। महीध्रः।
कुध्रः। सुपिस्थः। सुपीति योगविभागादन्यस्मादपि। द्वाभ्यां पिबतीति द्विपः। समस्थः। विषमस्थः। तत्रस्थः।
सुपिति पष्टतेकः। आरंभसामर्थ्याद्भावे। आरत्वा सुत्थानं आरत्था। अंबांबगोभूमिसव्यापद्वित्रिकुशे
कुशंक्वंगुमंजिपुंजिपरमेबर्हिर्दिव्यग्निभ्यस्थः। एभ्यः स्थः। सस्य षः स्यात्। द्विष्ठः। त्रिष्ठः। तुंदशोकयोः परि हेरंब
मृजापनुदोः। तुंदशोकयोः कर्मणोरुपपदयोराभ्यां कः स्यात्। आलस्यसुखाहरणयोरिति वक्तव्यं। तुंदप
रिमृजो अलसः। शोकापनुदः सुखस्याहर्त्ता। प्रेदासः। प्रोपसृष्टाद् दारुयाञ्जारूपात्वकः स्यात्। ३

सर्वप्रदः। पथिप्रस्थः। समिस्थः। गोसंख्यः। गोपोष्टकः। कर्मण्युपपदे। सामगः। पिबतेः सुरासीध्वोरिति वाच्यं॥
सुरापी। सीधुपी। हरतेरनुद्यमनेऽच्। अंशहरः। अनुद्यमने किं। भारहारः। राक्तिलांगलांकुरातोमरयष्टिघट
(५A) घटीधनुष्षु ग्रहेरुपसंख्यानं। शक्तिग्रहः। वयसि च। उद्यमनार्थं सूत्रं। कवचहरः कुमारः। आङि ताच्छी
ल्ये। पुष्पाण्याहरति तच्छीलः पुष्पाहरः। अर्हः। अस्मात्कर्मण्युपपदे। पूजार्हा ब्राह्मणी। स्तंबकर्णयोरमि
जपोः। हस्तिसूचकयोरिति वक्तव्यं। स्तंबेरमो हस्ती। कर्णेजपः सूचकः। अधिकरणे शेतेः। खे शेते खशयः।
पार्श्वादिषूपसंख्यानं। पार्श्वाभ्यां शेते पार्श्वशयः। पृष्ठशयः। उदरशयः। चरेष्टः। अधिकरणे उपपदे। कुरु
चरः। भिक्षासेनादायेषु च। भिक्षाचरः। सेनाचरः। आदायेति ल्यबंतं। आदायचरः। कृञो हेतुताच्छील्या
नुलोम्येषु। एषु द्योत्येषु कृञः टः। अतः कृकमिकंसकुंभपात्रकुशाकर्णीष्वनव्ययस्य। अतउत्तरस्यानव्यय
विसर्गस्य समासे नित्यं सादेशः करोत्यादिषु परेषु। यशस्करी विद्या। श्राद्धकरः। वचनकरः। दि
वाविभानिशाप्रभाभास्कारांतानंतादिबहुनांदीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजं
घाबाह्वहर्यत्तद्धनुररुष्षु। एषु कृञो टः हेत्वादावपि। दिवाकरः। विभाकरः। निशाकरः। कस्कादि
त्वात्सः। भास्करः। बहुकरः। एककरः। द्विकरः। अहस्करः। धनुष्करः। अरुष्करः इत्यादि। न शब्दश्लोक
कलहगाथावैरचाटुसूत्रमंत्रपदेषु। एषु कृञो टो न। शब्दकारः। इत्यादि। स्तंबशकृतोरिन्। व्रीहि
वत्सयोरिति वक्तव्यं। स्तंबकरिर्व्रीहिः। शकृत्करिर्वत्सः। हरतेर्दृतिनाथयोः पशौ। दृतिहरिः। नाथंनासा

रञ्जं हरतीति नाथहरिः पशुः। पशौ किं दृतिहारः। फलेग्रहिरात्मंभरिश्च। एतौ निपात्येते। चात्कुक्षिंभरिः। चो
ग्रस्तु आत्मोदरकुक्षिष्विति पेठुः। ज्यो त्स्नाकूरंभमुदरंभरयश्च कोरा इति मुरारिः। एजेः खश्। ण्यंतात्।
अरुर्द्विषदजंतस्य मुम्। अरुषो द्विषतोऽजंतस्य च मुम् स्यात् खिदंते उत्तरपदे न त्वव्ययस्य। छित्वाछ्वादि। एनं
एजतीति जनमेजयः। वातशुनीतिलशर्धेष्वजधेट्तुदजहातिभ्यः खश्। वातमजा मृगाः। खित्यनव्यय
स्य। ह्रस्वः। शुनिंधयः। तिलंतुदः। शर्द्धंजहा माषाः। नासिकास्तनयोर्ध्माधेटोः। स्तने धेटः। नासिकायां ध्म
श्चेति वक्तव्यं। नासिकंधमः। स्तनंधयः। दित्वात्स्तनंधयी। नाडीमुष्ट्योश्च। ध्माधेटोः खश्। नाडिंधमः। ना
डिंधयः। मुष्टिंधमः। मुष्टिंधयः। उदि कूले रुजिवहोः। कूलमुद्रुजः। कूलमुद्वहः। वहाभ्रे लिहः। वहः स्कंधः।
तं लेढीति। वहंलिहो गौः। अभ्रंलिहो वायुः। परिमाणे पचः। प्रस्थंपचा खाली। खारिंपचः कटाहः। मित
नखे च। मितंपचा ब्राह्मणी। नखंपचा यवागूः। विध्वरुषोस्तुदः। विधुंतुदः। अरुंतुदः। असूर्यललाट
योर्दृशितपोः। असूर्यमित्यसमर्थसमासः। दृशिना नञः। संबंधात्। सूर्यं न पश्यंतीति असूर्यंपश्या रा
जदाराः। ललाटंतपः सूर्यः। प्रियवशे वदः खच्। प्रियंवदः। वशंवदः। गमेः सुपि वाच्यः। मितंगमो हस्ती।
विहायसो विह च। खच्च डिद्वा वाच्यः। विहंगमः। विहंगः। भुजंगमः। भुजंगः। द्विषत्परयोस्तापेः। खच्।
वाचंयमपुरंदरौ च। वाक्पुरोरमंतत्वं निपात्यते। वाचंयमो मौनव्रती। व्रते किं। अशक्त्यादिना वाचंयच्छती हरेव
ति वाग्यमः। पूःसर्वयोर्दारिसहोः। पुरं दारयतीति पुरंदरः। सर्वंसहः। भगं दारयतीति भगंदर इति कथं।
बहुलग्रहणात्। सर्वकूलाभ्रकरीषेषु कषः। सर्वंकषः खलः। कूलंकषा नदी। अभ्रंकषो वायुः। करीषंकषा ४

वाच्या। मेघर्तिभयेषु कृञः। मेघंकरः। ऋतिंकरः। भयंकरः। भयशब्देन तदंतविधिः। अभयंकरः। क्षेमप्रियमद्रे
ण्च। एभ्यः कृञोण्स्याच्चात् खच्। क्षेमंकरः। क्षेमकारः। प्रियंकरः। प्रियकारः। मद्रंकरः। मद्रकारः। तर्थं तर्हि
अण्प्रारंभात् क्षेमकारादीति। कर्मण्यणः शेषत्वविवक्षायां पचाद्यच्। एवं गंगाधर भूधर इत्यादयः। आशिते भुवः क
(58) रणभावयोः। खच्। आशितो भवत्यनेनाशितंभव ओदनः। आशितस्य भवनमाशितंभवं। संज्ञायां भृ
तॄवृजिधारिसहितपिदमः। खच्। विश्वंभरा। विश्वंभरः। रथंतरं साम। पतिंवरा कन्या। शत्रुंजयो
हस्ती। युगंधरः पर्वतः। शत्रुंसहः। शत्रुंतपः। अरिंदमः। गमश्च। सुतंगमः। अंतात्यंताध्वदूरपारसर्वा
नंतेषु डः। गमेः। अंतगः। सर्वत्रपन्नयो वाच्यः। सर्वत्रगः। पन्नं पतितं गच्छतीति पन्नगः। उरसो लोपश्च।
उरसा गच्छतीत्युरगः। सुदुरोरधिकरणे। सुखेन गच्छत्यत्र सुगः। दुर्गः। अन्यत्रापि दृश्यत इति वाच्यं। ग्राम
गः। डे च विहायसो विहादेशो वाच्यः। विहगः। आशिषि हनः। शत्रुं वध्यात् शत्रुहः। आशिषि किं। शत्रुघा
तः। दारावाहनोणंतस्य च टः। संज्ञायां। दारुणो आङ्पूर्वाद्धंतेरण् टोंऽत्यस्य। दार्वाघाटः। चारौ वा। चा
र्वाघाटः। चार्वाघातः। अपे क्लेशतमसोः। अपपूर्वाद्धंतेर्डः। अनाशीरर्थमिदं। क्लेशापहः पुत्रः। तमोपहः
सूर्यः। कुमारशीर्षयोर्णिनिः। कुमारघाती। शिरसः शीर्षभावो निपात्यते। शीर्षघाती। लक्षणे जायापत्यो
ष्टक्। हंतेष्टक् स्याल्लक्षणवति कर्तरि। जायाघ्नो ना। पतिघ्नी स्त्री। अमनुष्यकर्तृके च। जायाघ्नस्ति
लकालकः। पतिघ्नी पाणिरेखा। पित्तघ्नं घृतं। अमनुष्ये किं। आखुघातः शूद्रः। अयवकुंथवल्लभद्र[illegible]

बह्वघ्नः। शत्रुघ्नः। कृतघ्नः सादिः मूलविभुजादित्वात्सिद्धं। चोरघातो नगरघातो हस्ती ति बाहुलकाद्दवा। शक्तौ
५ हस्तिकपाटयोः। हंतेष्टक्। मनुष्यकर्तृके चेन्न भिद्यते। हस्तिघ्नो ना। कपाटघ्नश्चोरः। कवाटेति पाठां
तरं। पाणिघताडघौ शिल्पिनि। शिल्पिनि किं। पाणिघातः। ताडघातः। राजघ उपसंख्यानं। राजानं
हंति राजघः। आढ्यसुभगस्थूलपलितनग्नांधप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्। एषु च्व्यर्थे
(6) च्व्यंतेषु कर्मसूपपदेषु कृञः ख्युन्स्यात्। अनाढ्यमाढ्यं कुर्वंत्यनया आढ्यंकरणी। अच्वौ किं। आढ्यीकु
र्वंत्यनेन। कर्तरि भुवः खिष्णुच्खुकञौ। आढ्यादिषु च्व्यर्थेष्वच्व्यंतेषु भवतेरेतौ स्तः। अनाढ्य आढ्यो
भवति आढ्यंभविष्णुः। आढ्यंभावुकः। स्पृशोनुदके क्विन्। दृशेः क्विन्। छिदभिदा छेदजिनी। राजामुपसर्गेपि क्विप्।
एभ्यः क्विप्सुपसर्गे सत्यसति च सुप्युपपदे। द्युसत्। सादिः प्रातिषः। उपनिषत्। अंडसूः। प्रसूः। मित्रद्विट्।
प्रद्विट्। मित्रध्रुक्। गोधुक्। प्रधुक्। अश्वयुक्। प्रयुक्। वेदवित्। निवित्। अग्रग्रामाभ्यां नयतेर्णो वाच्यः।
अग्रणीः। ग्रामणीः। भजो ण्विः। सुप्युपसर्गे चोपपदे। अंशभाक्। प्रभाक्। अदोनन्ने। विट्स्यात्। आ
ममतीत्याममात्। सस्यात्। अनन्ने किं। अन्नादः। क्रव्ये च। अदेर्विट्। पूर्वेणासिद्धे वचनं वासरूपेतिप्राप्ता
ण्वर्थं बाधनार्थं। क्रव्यात्। आममांसभक्षकः। दुःकपश्चाक्रामदुघा। अन्येभ्योपि दृश्यंते। मनिन् हेरंब
कनिप्वनिप्विच्। एते प्रत्यया धातोः स्युः। नेड्वशि कृति। वश्रादेः कृत इण्न। सुशर्मा। प्रातरित्वा। ५

(6A)

विड्वनोरनुनासिकस्यात् । अनुनासिकस्यात्स्यात् । ड्विडि वनि ग । विजायत इति विजा वा । कूण अपनयने ।
अवावा । रोट् । रोड् । सुगुण् । क्विप् च । अयमपि दृश्यते । उखास्रत् । पर्णध्वत् । वाहभ्रट् । अंतः । पदांतस्य
ति तेन्र्स्पणत्येस्यादुपसर्गस्थान्निमित्तात्परतश्चेत् । हे प्राण् । आशाः सः क्वौ । उपधाया इत्वं वाच्यं । आशीः ।
इत्यर्थे । निगृगोरतो । पूरतो । गीः । पूः । मोनो धातोः । प्रतौन् । प्रशान् । गमः क्वौ । अनुनासिकलोपः । अंगग
त । गमादीनामिति वक्तव्यं । परितत् । संयत् । ऊङ् । गमादीनामिति वक्तव्यं । लोपश्च । गः । भूः । रछः । भृच् ।
नात्क्विप् । सांरछः । सांरछाः । सुप्यजातौ णिनिस्ताच्छील्ये । अजात्यर्थे धातोर्णिनिस्ताच्छील्ये द्योत्ये उष्ण
भोजी । शीतभोजी । मनः । सुप्यपि मन्यतेर्णिनिः । दर्शनीयमानी । आत्ममाने खश्च । स्वकर्मके मनने वर्त्त
मानान्मन्यतेः । सुपि खश् । चात् णिनिः । पंडितमात्मानं मन्यते पंडितंमन्यः । पंडितमानी । इच एकाचोऽम्प्रत्य
यवच्च । इजंतादेकाचोऽम् स्यात्स च स्वाद्यम्वत् । खित्यनव्ययस्य । गांमन्यः । नाम्शब्दस्य । स्त्रियंमन्यः । स्त्री
मन्यः । नरंमन्यः । भुवंमन्यः । श्रियंमन्यः । श्रीमन्यः । श्रीमन्य इत्यपि । भाष्यकारप्रयोगात् । धूमशब्दस्य स्वो मम
रभावश्च । मते । अधिकारोऽयं । वर्त्तमाने लडिति यावत् । करणे यजः । करणेऽपपदे भूतार्थे यजेर्णिनिः कर्त
रि । सोमेनेष्टवान् सोमयाजी । कर्मणि हनः । पितृव्याघाती । ब्रह्मभ्रूणवृत्रेषु क्विप् । ब्रह्महा । भ्रूणहा । वृत्र
हा । क्विप् चेत्येव सिद्धे ब्रह्मादिष्वेव क्विबेवेति द्विविधनियमार्थमिदं । अन्येऽपि । सुकर्मपापमंत्रपुण्येषु कृ
ञः । सुकृत् । कर्मकृत् । पापकृत् । मंत्रकृत् । पुण्यकृत् । सोमे सुञः । सोमसुत् । अग्नौ चेः । अग्निचित् । कर्म
ण्यग्न्याख्यायां । कर्मण्युपपदे कर्मत्ययेव कारकेऽपि चिनोतेः क्विप् । अग्न्याधारस्थलविशेषस्याख्यायां ॥

म॰ कौ॰

६

(7)

श्येनइवचितः श्येनचित्। कर्मणीनिविक्रियः। कर्मण्युपपदे विपूर्वात्क्रीणातेरिनिः। कु। त्सितग्रहणं कर्तव्यं। सो
मविक्रयी घृतविक्रयी। दृशेः क्वनिप्। कर्मणि भूते। पारं दृष्टवान् पारदृश्वा। राजनि युधि कृञः। क्वनिप्।
युधिरंतर्भावितण्यर्थः। राजानं योधितवान् राजयुध्वा। राजकृत्वा। सहे च। सहयुध्वा। सहकृत्वा। सप्तम्यां
जनेर्डः। तत्पुरुषे कृति बहुलं। ङेरलुक्। सरसिजं। सरोजं। उपसर्गे च संज्ञायां। प्रजा। अनौ कर्मणि। अनुपूर्वाज्जनेः
कर्मण्युपपदे डः। पुमांसमनुरुध्य जाता पुमनुजा। अन्येष्वपि दृश्यते। अजः। द्विजः। ब्राह्मणजः। अपिशब्दः। स
र्वोपाधिव्यभिचारार्थः। तेन धात्वंतरादपि कारकांतरेष्वपि क्वचित्। परितः खाता परिखा। पंचम्यामजा
तौ। जातिशब्दवर्जिते पंचम्यंते जनेर्डः। संस्कारजः। अदृष्टजः। क्तक्तवतू निष्ठा। एतौ निष्ठासंज्ञौ स्तः। निष्ठा।
भूतार्थवृत्तेर्धातोर्निष्ठा स्यात्। तत्र तयोरेवेति भावकर्मणोः क्तः। कर्तरि कृदिति कर्तरि क्तवतुः। स्नातं मया।
स्तुतस्त्वया विष्णुः। विश्वं कृतवान् विष्णुः। निष्ठायामण्यदर्थे। ण्यदर्थो भावकर्मणी ततोन्यत्र निष्ठायां क्षियो दीर्घः स्यात्।
क्षियो दीर्घात्। दीर्घात् क्षिधातोः। निष्ठातस्य नः। क्षी[illegible] पावान्। भावकर्मणोस्तु क्षितः कामो मया। ऊर्णोर्णुवद्भावो वक्त
व्यः। तेन णत्वाभावान्न इट्। ऊर्णुतः। ऊर्णुतः। रदाभ्यां निष्ठातो नः पूर्वस्य च दः। रदाभ्यां परस्य निष्ठातस्य नः स्यात्। नि
ष्ठापेक्षया पूर्वस्य धातोर्दस्य च नः। शीर्णः। भिन्नः। छिन्नः। संयोगादेरातो धातोर्यण्वतः। यण्वतः संयोगादे
रातो निष्ठातस्य नः। द्राणः। ग्लानः। ल्वादिभ्यः। एकविंशतेर्लूञादिभ्यः प्राग्वत्। लूनः। ज्या। ग्रहिज्या। हलः।
अंगावयवाद्धलः परं यत्संप्रसारणं तदंतस्यांगस्य दीर्घः। जीनः। दुग्वोर्दीर्घश्च। दुगतौ। दूनः। गूनः। पूञो वि हेरंभ
नाशे। पूनाः। यवाः। विनष्टा इत्यर्थः। पूतमन्यत्। सिनोतेर्ग्रासकर्मकर्तृकस्य। सिनो ग्रासः। ग्रासितेर्थः। सि

६

तापाशेनसंकुरा। कर्मकर्तरि किं। सितो ग्रासो देवदत्तेन। ञि इतश्च। प्राग्वत्। भुजो। भुग्नः। टु। ओश्वि। शूनः।
द्रवमूर्तिस्पर्शयोः श्यः। द्रवमूर्तौ काठिन्ये स्पर्शे चार्थे श्यैङः। संप्रसारणं स्यान्निष्ठायां। श्योस्पर्शे। श्यै ङ निष्ठातस्य
नोऽस्पर्शेऽर्थे। शीनं घृतं। अस्पर्शे किं। शीनं जलं। द्रवमूर्तिस्पर्शयोरिति किं। संश्यानो वृश्चिकः। शीतात् संकुचित
इत्यर्थः। प्रतेश्च। संप्रसारणं निष्ठायां। प्रतिशीनः। विभाषाभ्यवपूर्वस्य। तथा। अभिश्यानं घृतं। अभिशीनं। अवश्या-
(७५) नो अवशीनो वृश्चिकः। व्यवस्थितविभाषेयं तेनेह न। समवश्यानः। अंचोनपादाने। निष्ठातस्य नः। यस्य विभाषा। य-
स्य क्वचिद्विहितस्ततो निष्ठाया इण्न। उदितो वेति क्त्वायानेट्का दि हनेट्। समः कूः। अनपादाने किं। उदक्तमुदकं कू-
पात्। दिवोऽविजिगीषायां। द्यूनः। विजिगीषायां तु द्यूतं। निर्वाणोऽवाते। अवाते इति छेदः। निः पूर्वाद्वाते र्निष्ठातस्य
नत्वं स्याद्वातश्चेत्कर्ता न। निर्वाणोऽग्निर्मुनिर्वा। वाते तु निर्वातो वातः। शुषः कः। निष्ठातस्य। शुष्कः। पचो वः। पक्वः।
क्षायो मः। क्षामः। स्त्यः प्रपूर्वस्य। प्रात्स्त्यः संप्रसारणं निष्ठायां। मस्यो न्यतरस्यां। निष्ठातस्य मो वा। प्रस्तीमः। प्रस्ती-
तः। प्रात्किं। स्त्यानः। अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः। एते निपात्यंते। फल इत्येकदेशस्यापीदं निपातनमि-
ष्यते। फुल्लः। ... अनुपसर्गात्किं। निष्ठायां तत्वं ... निपात्यंते। ओदितश्च। आकारेतो निष्ठाया इण्न। ञिफ-
चरफलो उदितो रेते ताकि निप्रफुल्लः। प्रक्षीबितः। प्रकृशितः। प्रोल्लाघितः। उत्फुल्लसंफुल्लयोरुपसंख्यानं। नुदविदो-
न्द्राघ्राह्रीभ्योन्यतरस्यां। निष्ठातस्य नः। नुन्नः। नुत्तः। विन्नः। वित्तः। उन्दी क्लेदने। ईदितो निष्ठायां। श्वयतेरी-
दितश्च निष्ठाया इण्न। उन्नः। उत्तः। इत्यादि। न ध्याख्यापॄमूर्छिमदां। एभ्यो निष्ठातस्य नो न। ध्यातः। ख्यातः। पूर्तः। र
लापः। ... रश्ललादावनुनासिकास्तेच प्रत्यये। मूर्तः। मत्तः। वित्तो भोगप्रत्यययोः। विंदतेर्निष्ठातस्य निपा

म॰ कौ॰
६
(४)

तायंभोग्यमतीतेचार्थेवित्तंधनं।वित्तःप्ररूषः।अनयोःकिं।भिन्नः।भित्तंशकलं।भिन्नमन्यत्।ऋणमाधमर्ण्ये।अन्यत्रम
न्यत्।स्फायः स्फी निष्ठायां।स्फीतः।इण्निष्ठायां।निरःकुषः।निष्ठायां इट्।यस्य विभाषेति निषेधे प्राप्ते पुनर्विधिः।
निष्कुषितः।वसतिक्षुधोरिट्।आभ्यां क्त्वानिष्ठयोः नित्यमिट्।उषितः।क्षुधितः।अञ्चेः पूजायां।क्त्वानिष्ठयोरि
ट्।अञ्चितः।अन्यत्रतु अक्तः।लुभो विमोहने।क्त्वानिष्ठयोरिट्।लुभितः।गार्ध्येतु लुब्धः।क्लि
शः क्त्वानिष्ठयोः इड्वा।क्लिशितः।क्लिष्टः।पूङश्च।क्त्वानिष्ठयोरिड्वा।पूङः क्त्वा च।निष्ठा क्त्वा च सेट् किंन स्यात्।पू
वितः।पूतः।क्त्वाग्रहणमुत्तरार्थं।नोपधादित्यत्र हि कैव संबध्यते।निष्ठाशीङ्स्विदिमिदिक्ष्विदिधृषः।एभ्यः
सेड्निष्ठा किन्न।शयितः।आदिकर्मणि क्तः कर्तरि च।आदिकर्मणि क्तः कर्तरि स्याच्चात्प्राग्वत्कर्मणोः।विभाषा
भावादिकर्मणोः।भावे आदिकर्मणि च आदितो निष्ठा वा इट्।प्रश्वेदितश्चैत्रः।प्रस्वेदितं तेन।अश्विदिति भ्वादि
स्त्रग्गृह्यते।ञिक्ष्विदा स्नेहनमोचनयोः।स्विद्यतेस्तु स्विद्।इत्यस्य वा।ञिमिदा।ञिक्ष्विदा।दिवादी भ्वादी च।प्रमेदितः।
प्रक्ष्वेदितः।प्रधर्षितः।प्रधर्षितं तेन।सेट्किं।प्रस्विन्नः।प्रस्विन्नं तेन।सादिः।प्रधर्षिता।निष्ठायां।सेटि निष्ठा किं
न।मर्षितः।क्षमायां वेट्।अपमर्षितं वाक्यं।अविस्पष्टमित्यर्थः।उदुपधाद्भावादिकर्मणोरन्यतरस्यां।सेटि
निष्ठा वा किन्न।द्युतितं।द्योतितं।मुदितं।मोदितं।साधुना।प्रद्युतितः।प्रद्योतितः।प्रमुदितः।प्रमोदितः।साधुना।
उदुपधात्किं।विदितं।भावेत्यादि किं।रुचितं।कार्षापणं।सेट्किं।कुष्टं।शब्विकरणेभ्य एवेष्यते।नेह।गुध्यतेर्गु हरेंब
धितं।निष्ठायां सेटि।णेर्लोपः।भावितः।भावितवान्।दृढः स्थूलबलयोः।स्थूले बलवति च निपात्यते दधातेर्हिः। ७

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8A)

ता दौकिति। हितं। दो धत्तोः। पुंसंस्नस्य दाइत्यस्य दथ्। ता दौकिति। वर्त्तं। दत्तः। गत्यर्थाकर्मकश्लिषशीङ्स्थास
वसजनरुहजीर्यतिभ्यश्च। एभ्यः कर्त्तरि क्तः स्याद्वा चकर्मणि च। गंगां यातः। गंगां प्राप्तः। ग्लानः सः। लक्ष्मीमा
श्लिष्टो हरिः। शेषमधिशयितः। धाति स्यतिमास्थामितिकिति। एषामिकारोंता देशः स्यात्तादौकिति। वैकुंठमधिष्ठि
तः।। शिवमुपासितः। हरिदिनमुपोषितः। राममनुजातः। गरुडमारूढः। विश्वमनुजीर्णः। पक्षे प्राप्ता गंगा तेनेत्यादि।
क्तोधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः। एभ्योधिकरणे क्तः चाद्यथाप्राप्तं। मुकुंदस्यासितमिदमि-
दं यातं रमापतेः। भुक्तमेतदनंतस्य। सूचुगोयादिदर्सनं। पक्षे आसेरकर्मकत्वात्कर्त्तरि भावे च। आसिता
मुकुंदः। आसितं तेन। गत्यर्थेभ्यः कर्त्तरि कर्मणि च। यातो रमापतिरिदं यातं तेन। नैतेनेदं यातं। भुंजेः क्तः कर्मणि। अन्नं तेन भुक्
तं। क्तो न वर्त्तमाने इत्यधिकृत्यागमीत्वः रुचः। दृष्टाणाः। मतिबुद्धिपूजार्थेभ्यश्च। राज्ञां मतः। इष्टः। बुद्धः। विदितः।
पूजितः। आर्चितः। चकाराच्छीलितो रक्षितः। क्षांत आक्रुष्टो जुष्ट इत्यादि। नपुंसके भावे क्तः।
क्लीबत्वविशिष्टभावेच्छायां सामान्ये क्तः। आसितं। हसितं। शुष्कज्ञाडुःनिप। भूतैश्चाय यज्ञा। जीर्यतेरतृन्। भूतेइ-
ष्टवा। जरन्। जरंतौ। वा। असरूपन्यायेन निष्ठापि। जीर्णः। जीर्णवान्। छंदसि लिट्। लिटः कानज्वा। क्वसुश्च। भूतसामा
न्ये छंदसि लिट् तस्य कानच् क्वसू वा स्तः। तङानावात्मनेपदं। चक्राणः। म्रियोम्यां। जग्मिवान्। कवयस्तु भाषायामपि लिटः कानच्क्वसू प्रयुं
के प्रयुंजते। तं तस्थिवांसं नगरोपकंठे। श्रेयांसि सर्वाण्यधिजग्मुषस्ते इत्यादि। वस्वेकाजाद्घसां। कृतद्विर्वचनानामेका
चामादंतानां घसेश्च वसोरिट् स्यान्नान्येषां। आदिवान्। ददिवान्। जक्षिवान्। एषां किं। बभूवान्।

(१)

भाषायांसदवसश्रुवः।सदादिभ्योभ्रतेसामान्येभाषायां।विदुषस्यातस्यचनित्यंध्वसुः।निषेदुषीमासनबंधधीरः।
अध्यूषुषस्तामभवन्नूजनस्य।शुश्रुषवान्।उपेयिवाननाश्वाननूचानश्च।एतेनिपात्यंतेउपादिनोलिड्डातस्यच
नित्यंध्वसुः।इट्।उपेयिवान्।नात्रोपसर्गस्तंत्रं।ईयिवान्।समीयिवान्।नञोःश्नातेःक्रसोलिडभावश्चअना
श्वान्।अनोर्वचेःकर्तरिक्वानच्।वेदस्यानुवचनंकृतवान्।अनूचानः।लटःशतृशानचावप्रथमासमानाधिक
रणे।अप्रथमांतेनसमानाधिकरणेलटएतौवास्तः।शबादि।पचंतंचैत्रंपश्य।आनेमुक्।अंगस्यातोमुक्आगमः।—
आने।पचमानंचैत्रंपश्य।लङ्सत्वर्तमाने।पचन्नर्हुहणात्प्रथमासमानाधिकरणेपिक्वचित्।सन्द्विजः।
ईदासः।आनस्यईत्।आदेःपरस्य।आसीनः।विदेःशतुर्वसुः।वेत्तेःपरस्यशतुर्वसुरादेशोवा।विदन्।विद्वान्।तौ
सत्।तौशतृशानचौसत्संज्ञौ।लृटःसद्वा।करिष्यंतंकरिष्यमाणंपश्य।आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु।क्वि
पमभिव्याप्यवक्ष्यमाणास्तच्छीलादिषु।कर्तृषुबोध्याः।तृन्।कर्ताकटान्।स्पृहिगृहिपतिदयिनिद्रातंद्राश्रद्धा
भ्यआलुच्।आधास्तच्छःयःचुरादावदंताः।स्पृहयालुः।शीङोवाच्यः।शयालुः।अलंकृञ्निराकृञ्प्रजनोत्पचोत्प
तोन्मदरुच्यपत्रपवृतुवृधुसहचरइष्णुच्।अलंकरिष्णुः।णेश्छन्दसि।वेरइष्णुः।भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः
क्विप्।अस्मिन्प्रकरणेभ्रस्जःअथ।नत्वकारप्रश्लेषान्नेह।भ्रष्टः।पुत्रःक्षिणुःधिः।भिक्षुःविपि
कुः।जस्तुः।गृधुः।धृष्णुः।क्षिप्नुः।शामितयष्टाभ्योधिनुण्।उकारउच्चारणार्थइतिकाशिका।अनुबंधइतिभाष्यं।तेनशा
मितराशामीलितेत्यत्रऊगितश्चेतिरस्वाविकल्पः।नचैवंशामीशामिनौ।विस्पादिनोनुम्प्रसंगः।अस्त्वमहत्सामा
न्यव्यवस्थितानामेवतद्विधानात्।नोदात्तोपदेशस्येतिवृद्धिनिषेधः।शामी।तमी।स्वादि।संपृचानुरुधा

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

हेरंब

(9A)

घ्नमाद्यस परिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिदहेपरिवदेपरिमुहदुषद्विषद्रुहदुहयुजाक्री
डाविविचत्यजरभजातिचरापचरामुषाभ्याहनश्च ॥ घिनुण्स्यात्तासे पकीर्तसी ॥ वीकषलसकत्थस्रम्भः ॥ विकत्थी
अपचलक्षः । चाट्टो आपलाषी । चलनशब्दार्थादकर्मकाद्युच् । चलनशब्दार्थाद्युच् । चलनः । कंपनः । शब्दनः ।
रवणः । अकर्मकात्किं पठितानिषिद्धौ । अनुदात्तेतश्च हलादेः अकर्मकाद्युच् । वर्तनः । वर्द्धनः । अनुदात्तेतः किं भ
विता । हलादेः किं । एधिता । अकर्मकात्किं । वसिता वासः । निंदहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवा-
दिव्याभाषासूयो वुञ् । एभ्यो वुञ् । निंदकः । हिंसकः । देविकृशोश्चोपसर्गे । आदेवकः । आक्रोशकः । उपस
र्गे किं । देवयिता । क्रोष्टा । लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ् । लाषुकः । जल्पभिक्षकुट्टलुंटवृ
ङः षाकन् । जल्पाकः । सनाशंसभिक्ष उः । चिकीर्षुः । आशंसुः । भिक्षुः । यजजपदशां यङः । यातेर्यङं । तादर्थ्यसेत्यतो लोपः ।
तस्याचः परस्मिन्निति स्थानिवत्त्वे प्राप्ते । न पदांतद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधि
षु । पदस्य चरमावयवे द्विर्वचनादौ च कर्तव्ये परनिमित्तकोऽजादेशो न स्थानिवत् । इति यलोपं प्रति स्थानिवत्त्वनिषे-
धाल्लोपो व्योर्वलीति यलोपः । अल्लोपस्य स्थानिवत्त्वमाश्रित्य यल्लोपे प्राप्ते वरे लुप्तं न स्थानिवत् । यायावरः । भ्रा
जभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप् । विभ्राट् भाः । धूः । विद्युत् । ऊर्क् । पूः । दृशिग्रहणस्यापकर्षणाज्जु
जवतेर्दीर्घः । जूः । जुवौ । जुवः । ग्रावस्तुत् । क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च । वक्तीति
वाक् । पृच्छतीति प्राट् । आयतं स्तौति आयतस्तूः । कटं प्रवते कटप्रूः । जूः । श्रीः । अयं निर्देशः प्रित्री । दाम्नीशस
युयुजस्तुतुदसिसिचमिहपतदशनहः करणे । दाबादेः ष्ट्रन् करणेऽर्थे । दात्यनेन दात्रं । नेत्रं । तत्र सितं सेक्त्रं

म·कौ·

९

(101)

सेषु च। एषां दन्त्रा नाभिण्न। शस्त्रं। योत्रं। योक्त्रं। स्तोत्रं। सेत्रं। सेक्त्रं। मेढ्रं। पत्रं। दंष्ट्रा। नध्री। हलसूकरयोः पुवः। पुङ् पूत्रोः।
करणे ष्ट्रन् तत्रैव करणे। हलसूकरयोरवयवः। हलस्य सूकरस्य वा पोत्रं। मुखमित्यर्थः। अर्तिलूधूसूखनसहचर इत्रः। अ
रित्रं। लवित्रं। धवित्रं। सवित्रं। खनित्रं। सहित्रं। चरित्रं। पुवः संज्ञायां। पवित्रं। कृवापाजिमिस्वदिसाध्यशूभ्य उण्।
कारुः। वायुः। पायुः। गुदं। जायुरौषधं। मायुः पित्तं। स्वादुः। साध्नोति परकार्यमिति साधुः। कृशानीति
गतौ। अस्मात् हरिमितयोरुपपदयोः कुः स च डित्। हरिमिदीयते हरिद्रुर्वृक्षः। आशुर्व्रीहिः। हरिमितयोर्द्रुवः। द्रु
द्रवतीति मितद्रुः समुद्रः। अर्हत्। जम्बूः। कफेलुः। कर्कन्धूः। दिव्यूः। एते कु प्रत्ययान्ता निपात्यन्ते। शते च। शतं [illegible] ध्या
[illegible]या देवाद्वन्द्वेन भवति। षंढः। स्यात्पुंसि [illegible] पतौ के मेरण्डः। मठः। कुछपकुम्भि भांडभेदेन पुंस्युक्तमिति मेदिनी। मल्लः।
हूहूश्च। रामठं हिंगुः। रामेः खः। शंखः। कुण्डः। कुण्ठः। अमेताडुः। ओमिति प्रत्याहारः। दंडोलगुडेपि स्याद्दिति मेदिनी। रमे
रः। रंडा। मूषिकपर्ण्यां च विधवायां च योषिति इति मेदिनी। खंडः स्त्रीशकले। न ध्रुवि कार मणि भेदयो इति मे
दिनी। मनस्तानो मंडः। पंचांगुले ग्रुपक भेदेकी। बंडः। मस्तुनीति मेदिनी। पतिचंडि भ्यामाल[illegible]। पाताले नागलोके स्यादिति
मेखलानेऽद्रुति मेदिनी। चंडालो मातंगः। प्रज्ञादित्वाद्दीप्ता चंडालो पापी। सुख्वले दत्तः। तन्त्र। कुलालवरूडकर्मार
निषाद चंडाल मित्रामित्रेभ्यश्छंदसीति चंडाल[illegible] स्वार्थे अण्। विदधाबान्तिके नतद्धाव्येषा[illegible] हविरोधा
तः। गन्नगम्यद्योः। गंगा। अङ्ः पुरोडाशः। भञ्जः क्षितरनुहू च। भञ्जो गन्धकि तु स्यात्तस्य नुद्भुच। भोगाः। किंद्धालि
धूम्याधः। श्रतातेर्ह स्वश्च। श्वंगं। अर्त्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्। अन्यश्चद्भु
दिशाभ्यो मन्। अर्मश्चक्षूरोगः। स्तोमः। सोमः। होमः। सर्मो गमनं। धर्मः। क्षेमं। कुशलं। क्षोम[illegible]। आदित्याभ्या
यामः। वामः। नामन् [illegible] पद्मा। यक्ष्मो रोगराजः। नेमः। अवतेष्टिलोपश्च। मन्प्रत्ययस्यायादिलोपानप्रकृतेः।

हेरंब

९

(10A)

अन्यथाऽसेवक्रूयात्। स्वरस्वरतिश्व्यधिमवामुपधायोश्च। एषामुपधावकारयोः क्रुक्रौसज्ञाक्तुनासिकादौचप्रत्यये।
अत्राङ्कीतीतिनानुवर्त्तते। अवतेस्तुनिवृत्ते ओतुरिति दर्शनात्। स्वरादिपाठा दृश्यपत्वं। अवतीति ऊम्। ग्रसेरा
च। ग्रामः। अविसिविसिशुषिभ्यः कित्। उमन्नगरं। स्यूमो रश्मिः। सिमः सर्वः। शुष्मः अग्निसमीपयोः। घर्मः।
पश्चात् निपातोयं। ग्रीष्मः। ग्रसतेर्निपातोयं। अश्रुप्रुषिलटिकणिखटिविशिभ्यः क्वन्। अश्वः। प्रुष्वः स्या
दृतुसूर्ययोः। लट्वा पक्षिभेदः फले च। कण्वं पापं। खट्वा। विश्वं। कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः।
योनी। तियुवा। वृषा इंद्रः। तक्षा। राजा। धन्वा मरुः। धन्व शरासनं। द्युवा सूर्यः। प्रतिदीव्यत्यस्मिन् प्रतिदिवा
दिवसः। उविकुषिगार्तिभ्यः स्थन्। ओष्ठः। कोष्ठं। गाथा। अर्थः। पातृतुदिवचिरिचिसिचिभ्यस्थक्। पी
थोरविः घृतं पाथं। तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमंत्रिषु। अवतारर्षिजुष्टांभः स्त्रीरजःसु चेवि
क्थमिति विश्वः। तुत्थोग्निः। उक्थं सामभेदः। रिक्थं। बुद्बुलकाद्वेचेरपि। ...चिभ्क्थं धनं वसु। सि
क्थं। क्लानुदिभ्यां डौः। ग्लौः। नौः। चिरवर्यं। रोरित्येवं ग्लौकूरानि। कन्मेजंतु इतिसिद्धे नियमार्थमि
दं। उणादिप्रत्ययान्ताः। ...तावेति। गमेर्डोः। गौः। नादेस बलीवर्दे। किरणाक्रतुभेदयोः। स्त्रीतु स्यादि
शि भा रसा भमो। उसुरभावपि। स्त्रियाः स्वर्गवज्रांबुरश्मिदृग्बाणलोमसु। बाहुलकाद्युतेर
पिडोः। द्योस्त्री स्वर्गांतरिक्षयोः। रातेर्डैः। राः। भमेश्च डूः। भ्रूः। उदनेडौ पश्चा। चाद्युच्। आदनः। ग
मेर्गश्च। चाद्युच्। गगनं। कृपृवृजिमंदिनिधाञः क्युः। किरणाः। पुरणाः समुद्रः। वृजनं मंदारिः। मंद
नं स्तोत्रं। निधनं। धृषेर्धिषच्च संज्ञायां। धिषणा गुरुः। धिषणा धीः। नप्तृनेष्टृत्वष्टृहोतृपोतृ

भ्रातृजामातृमातृपितृदुहितृ। एते तृन्तृजंता निपात्यंते। नप्ताइत्यादि। स्वसा। वसेर्ऋन्‌। स्वसा। यते
र्वृद्धिश्च। भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परं। नञि च नंदेः। न नंदति। ननांदा। दुहः पाहिर्नोनु
वर्तत इस्वेफे। ननांदा तु स्वसा पत्युर्ननंदा ननांदिनी चसेति शब्दार्णवः। दिवेर्ऋन्‌। देवा। देवरौ। नयतेर्डिच्च।
ना। नरौ। अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः। अर्चिः। शोचिर्दरुप्तिः। हविः। सर्पिः। इस्मन्त्रन्क्विषु च।
छादेर्ह्रस्वः स्यात्‌। छदिः पटलं। छर्दिः। बर्हेर्नलोपश्च। बर्हिर्ना कुशशुष्मणोः। द्युतेरिसिन्नादेश्च जः। ज्यो-
तिः। जनेरुसिः। जनुर्जननं। अर्तिपृवपियजितनिधनितपिभ्यो नित्‌। अरुः। परुर्ग्रन्थिः। वपुः। यजुः। तनुः। तनुषी।
धनुरस्त्रियां। नपुंसकत्वमार्षं। एतेर्णिच्च। आयुः। आयुषी। चक्षेः शिच्च। चक्षुः। मुहेः किच्च। मुहुरव्ययं। पानी
विषिभ्यः पः। रक्षश्चस्मोऽत्‌ ईनामिति पापं। नयोगात्‌ लोपः। नेपः। नीपो ऽसि। पुरोहितः। वेष्पः। पानीयं। खुदो दि
घश्च। स्तूयः। समुच्छ्रायः। स्तुशृभ्यां किच्च। चात्कित्‌। सू। सूपः। बाहुलकाद्‌ दुवो। धूपः। कुयुभ्यां च। कुर्वन्ति मंडूका
अस्मिन्निति कूपः। युवंति बध्नंति अस्मिन्पशुमिति यूपः। स्वप्यात्‌ शिल्पशष्पबाष्परूपपर्पतल्पाः। सप्तैते पप्रत्य-
यांता निपात्यंते। स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच्‌। अयामंतेति रयाय। स्तनयित्नुः। हर्षयित्नुः। पोषयित्नुः।
गदयित्नुः। मदयित्नुः। मदिरा। अशेः सरः। अक्षरं। वसेश्च। वत्सरः। संपूर्वात्‌ चित्‌। संवत्सरः। कृशृशलिक हेरंब
लिगर्दिभ्योऽभच्‌। करभः। शरभः। कलभः। शलभः। गर्दभः। ऋषिवृषिभ्यां कित्‌। ऋषभः। वृषभः। रासिवल्लि
भ्यां च। रासभः। वल्लभः। नियो मिः। नेमिः। अर्तेरुच्च। ऊर्मिः। भुवः कित्‌। भूमिः। अंगेर्निर्नलोपश्च। अग्निः। १०

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com